ऽर्थे वा अव्ययी०। अग्नौ अग्निसमीपे वेत्यर्थे। तत्र स्थाने विवाहादौ स्त्रीभ्यो दत्ते धनादौ न०। स्मृतिशास्त्रे चास्मिन्नर्थे पारिभाषास्य कृता यथा "विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ। तदध्यग्नि कृतं सद्भिः स्त्रीधनं परिकीर्त्तितमिति" कात्या०। "अध्यग्न्यध्यावाहानिकं दत्तं च प्रीतिकर्म्मणि भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतमिति" मनुः। "पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्। आधिवेदनिकाद्यञ्च स्त्रीधनं परिकीर्त्तितमिति याज्ञ०। "विवाहकालेऽग्नावधिकृत्य मातुलादिदत्तमिति" मिताक्षरा। अध्यग्निकृतमित्येकं पदं दत्तमध्यग्न्युपागतमित्येकवाक्यत्वात् कृतं दत्तमित्यर्थः इत्येके।

**अध्यच्** त्रि० अधि+अन्चु—क्विप्। अधिगन्तरि।

**अध्यण्डा** स्त्री अधिकमण्डमिव वीजं यस्याः ईत०। अधिक वीजवत्याम् (भुंइ आमला) इति ख्यातायाम् भूम्यामलक्याम्।

**अध्यधिक्षेप** पु० अधिकोऽधिक्षेपः प्रा०स०। अत्यन्तनिन्दायामतिशयतिरस्कारे च "गुरूणामध्यधिक्षेप" इति।

**अध्यधीन** त्रि० आधिक्येन अधीनः। अत्यन्ताधीने गर्भदासे तस्य जन्मावधि दासत्वात् क्रयविक्रयार्हत्वाच्च तथात्वम्।

**अध्यय** पु० अधि—इङ्—इक् वा भावे अच्। अध्ययने स्मरणे च।

**अध्ययन** न० अधि+इङ—ल्युट्। पठने, गुरुमुखोच्चारणानुसारिणि उच्चारणे च। अध्ययनञ्चाक्षरमात्रपाठ इति वैदिकाः सार्थाक्षरग्रहणमिति मीमांसकाः। "इज्याध्ययनदानानि तपः सत्यं क्षमा दमः। अलोभ इति मार्गोऽयं धर्म्मस्याष्टविधः स्मृत" इति "अब्राह्मणादध्ययनमापत्काले विधीयते" इति "श्रुताध्ययनसम्पन्न" इति च स्मृतिः अध्ययनं च वेदाध्ययनं तत्र च त्रैवर्णिकानामधिकारः यथोक्तं मनुना। "अध्यापनमध्ययनं यजनं याजनं तथा, दानं प्रतिग्रहञ्चैव ब्राह्मणानामकल्पयत्॥ प्रजानां रक्षणं दानमिज्याध्ययनमेव च। विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः। पशूनां रक्षणं दानमिज्याध्ययनमेव च। वणिक्पथं कुसीदञ्च वैश्यस्य कृषिमेव च" इति मनुः। वेदाध्ययनञ्च ब्रह्मयज्ञत्वेनाभिधीयते तच्च ब्रह्मयज्ञशब्दे वक्ष्यते तच्च सार्थाध्ययनमेव प्रशस्तं यथोक्तं ब्राह्मणसर्वस्वे "कूर्म्मपुराणे। न वेदपाठमात्रेण सन्तोषं कारयेद्गुरुः। पाठमात्रावसनस्तु पङ्के गौरिव सीदति। योऽधीत्य विधिवद्विप्रो वेदार्थं न विचारयेत् स सान्वयः शूद्रसमः पात्रतां न प्रपद्यते"। व्यासः "वेदस्याध्ययनं कार्य्यं धर्म्मशास्त्रस्य चापि यत्। अजानतार्थं तत् सर्वं तुषाणां कण्डनं यथा" तथा "यथा पशुर्भारवाही न तस्य भजते फलम्। द्विजस्तथार्थानभिज्ञो न वेदफलमश्नुते"। तथा "पाठमात्ररतान्नित्यं द्विजातींश्चार्थवर्ज्जितान्। पशूनिव च तान् प्राज्ञो वाङ्मात्रेणापि नार्च्चयेत्। श्रुतहीनमधीतं यच्चेह नामुत्र तद्भवेत्। श्रुतन्तु केवलमपि समुद्धाराय कल्पते"। स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्। अर्थवित् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा। व्यासः। "योऽधीते नार्थतत्त्वज्ञस्तस्य तद्धारणं वृथा। भारवाहीव भृतकः केवलं क्लेशभाग्भवेत्। तस्मादर्थपरिज्ञाने यत्नः कार्य्यो विजानता"। व्यासः। "ज्ञानं कर्म्म च संयुक्तं मुक्त्यर्थं कथितं यथा। अधीतं श्रुतसंयुक्तं तथा श्रेष्ठं न केवलम्" व्यासः। "अधीत्य यत्किञ्चिदपि वेदार्थाधिगमे रतः। स्वर्गलोकमवाप्नोति धर्म्मानुष्ठानविद्द्विजः"। मनुः "वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्। इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते"। व्यासः। "समुच्चितं स्तोकमपि श्रुताधीतं विशिष्यते। चतुर्णामपि वेदानां केवलाध्ययनात् द्विजात्"। वृहद्व्यासः "अनूचानाग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणोवराः। धारिभ्यश्चार्थतत्त्वज्ञास्तेभ्योऽप्यध्यात्मचिन्तकाः" इति॥ एतच्च स्वाध्यायोऽध्येतव्य" इति श्रुतौ मीमांसकैः विस्तरतो व्यवस्थापितम्।

**अध्यर्द्ध** त्रि० अधिकमर्द्धं यस्य ब०। स्वार्द्धेन सहिते वस्तुमात्रे। "एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्द्धं ततोऽनुज" इति मनुः। एकाधिकमंशं द्वावंशाविति यावत् ज्येष्ठपुत्त्रो गृह्णीयात् अधिकमर्द्धं यत्रांशे सार्द्धमंशं इति कुल्लू०। अर्द्धशब्दः रूपकार्द्धे रूढ़ः तेन सार्द्धरूपके च। अध्यर्द्धपूर्व्वात् क्रीताद्यर्थे "अध्यर्द्धपूर्व्वद्विगोर्लुगसंज्ञायामिति" पा० अध्यर्द्धपूर्व्वात् द्विगोश्चार्हीयस्य टञो लुक्। अध्यर्द्धकंसम्। "विंशतिकात्ख" इति पा०। खविधाच्च लुक्। अध्यर्द्धविंशतिकीनं "खार्य्याईकन्" पा०। अध्यर्द्धखारीकम् "पणपादमाषशताद्यत्" पा०। अध्यर्द्धपण्यं अध्यर्द्धपाद्यम् अध्यर्द्धमाष्यम् अध्यर्द्धशत्यम् "शाणाद्वेति" पा० यत् ठञ् तस्य लुक्च वेति अध्यर्द्धशाण्यम् अध्यर्द्धशाणम्। इत्यादयः शब्दाः तत्क्रीतार्थे त्रि०। अध्यृध्नोति यत्र अधि+ऋध—आधारे घञ्। वायौ। "कत्येव देवा याज्ञवल्क्य! इति" याज्ञवल्क्यं प्रति शाकल्यप्रश्ने तत्र याज्ञवल्क्येन "अध्यर्द्ध" इत्युत्तरं (वृ०उ०) दत्तम् तस्य विशेषज्ञानाय